श्रीगणेशायनमः॥ अथसहस्रभोजनप्रयोगउच्यते॥ कर्त्तासपत्नीकः कृतमांगलिकस्नानः सम्योपदिष्टमात्मशुध्यर्थंपूर्वोत्तरांगसहितंप्रायश्चित्तंविधायतदुत्तरंउपकल्पितदशसाद्र्व्यंब्राह्मणेभ्योदत्वायदुपकल्पितंद्रव्यंतत्प्रोक्षणेनशुद्धंकुर्वितिब्राह्मणानामनुज्ञांलब्ध्वातद्द्रव्यंप्रोक्षयेत्॥ ततःशुचिराचम्यप्राणानायम्यदेशकालौसंकीर्त्यमहापातकादिनिवृत्तिपूर्वकंसकलमनोरथसिद्धिपूर्वकंब्रह्मानंदावाप्तिकामःश्रीपरमेश्वरप्रीत्यर्थंसहस्रब्राह्मणान्यथाशक्तियथोपपन्नेनान्नेनयथाकालंयथादेशंभोजयिष्येइतिसंकल्प्य॥ तदंगत्वेनगणेशपूजनादिनांदीश्राद्धंतुविधायतदंगत्वेनभवानीशंकरादिदेवतास्थापनंपूजनंहोमंचकरिष्येइतिसंकल्प्य। तदर्थंआचार्यंब्राह्मणंअष्टौऋत्विजश्चवृत्वासमर्चयेत्॥ ततआचार्यादयआदृत्यप्राणानायम्यसमाहितमनसःकर्मकुर्युः॥ तत्रआचार्यःयजमानेनवृतोहमाचार्यकर्मकरिष्येइतिसंकल्यपूर्वकंसर्षपविकरणादिविघ्नोदकयजनरक्षस्त्वंतंकुर्यात्॥ शिव १

ततःशुचौदेशेसुशोभनांचतुरस्रांपुष्पमंडपिकांकृत्वातन्मध्येसर्वतोहस्तमात्रांवज्रहृयकुंड

सहितंअग्नेशोत्रोदिंविधायतत्रलिंगतोभद्रंविभाव्यतत्रब्रह्मादिमंडलदेवतास्थापनंपूजनंचविधायतदुपरिमहीद्यौरित्यादिनातंडुलोपरिवस्त्रवेष्टितंकलशंसंस्थाप्यतदुपरिपूर्णपात्रंनिधायतत्रवस्त्रादीपीठंविरचयेत्॥ तच्चशतकर्णिकात्मकपद्मरूपं॥ ततःकर्षपरिमितांसौवर्णींभवानीशंकरप्रतिमांअन्युत्तारणादिनासंस्कृत्यतत्रप्राणप्रतिष्ठांविधायकुंडायेतिमंत्रेणनाममंत्रेणवाविरचितपीठस्थायांप्रतिमायांभवानीशंकरमावाहयेत्॥ तद्दक्षिणतःविल्वपद्मकर्णिकायामेवइदंविल्वइतिमंत्रेणावाह्य। प्रतिमोत्तरतःतथैवब्रह्मज्ञानमितिमंत्रेणब्रह्माणमावाहयेत्। तद्बहिस्तुचतुर्दलेषुआग्नादिक्रमेणगणेशदुर्गाक्षेत्रपालाभयंकरानावाहयेत्। तद्बहिस्तुषोडशदलेषुआग्नादिक्रमेणगौर्यादिषोडशमातॄःआवाहयेत्। तद्बहिस्तुकत्रिंशद्दलेषुतथैवधरायनमःधरंआवाहयामीत्येवंसर्वत्र॥ ध्रुवं॰सोमं॰आपं॰अनिलं॰अनलं॰प्रत्यूषं॰प्रभासं॰इत्यष्टौवस्वन्॰वीरभद्रं॰शंभुं॰गिरीशं॰अजैकपादं॰अहिर्बुध्न्यं॰पिनाकिनं॰अपराजितं॰भुवनाधीश्वरं॰कपालिनं॰स्था

स०वि० २ ष्णं०भगं०इत्येकादशरुद्रान्। धातारं०अर्यमणं०मित्रं०वरुणं०ईशं०भगं०इंइं०विवस्वंतं० पूषणं०पर्जन्यं०त्वष्टारं०विष्णुं०इतिद्वादशादित्यांश्चावाह्य। तद्बहिस्त्वाष्टाचत्वारिंशेषुदलेषु तथैव। नवग्रहान्। दशलोकपालान्। कश्यपादिसप्तर्षीन्। पूर्वदक्षिणपश्चिमोत्तरान्। चतुःसमुद्रान्। गंगायमुनागोदावरीसरस्वतीनर्मदाकावेरीतिसप्तनदीः। सत्वंरजस्तमइतिगुणान्। ऋग्वेदादिचतुर्वेदान्। आत्मनेनमइत्यात्मानंचावाह्य भवानीशंकरादीन्षोडशोपचारैः पूजयेत्। प्रतिमापूजनेपावमानीभिर्ऋग्भिश्चाभिषेकइतिविशेषः। देवदेवजगन्नाथविश्वसाक्षिन्जगद्गुरो गृहाणेमांकृतांपूजांप्रसीदपरमेश्वर इतिपूजांदेवायसमर्पयेत्। ततः स्नात्यंत्रेणग्रहमखंकरीत्याग्रहमखंसमाप्यप्रधानहोमार्थंकुंडंस्थंडिलंवाविधायस्रग्घ्याक्रविधिनाग्निप्रतिष्ठापनाद्यन्वाधानंत्राकृभाविकर्मकृत्वान्वाधानंकुर्यात्। तत्रविशेषः। श्रीभवानीशंकरंकृइहायेतिमंत्रेणसहस्रसंख्याकाभिःसमिद्राज्यचरुतिलमिश्रयवाकृतिभिः अधिदेवतांविष्णुंइदंविष्णुरितिमंत्रेणाष्टोत्तरशतसंख्याकाभिःपूर्वोक्तसमिदादि शिव २

इध्याकृतिभिः प्रत्यधिदेवतांब्रह्माणंब्रह्मजज्ञानमितिमंत्रेणाष्टोत्तरशतसंख्याकाभिःपूर्वोक्तसमि०तिभिःप्रजापतिंसमस्तव्याहृतीभिःद्विनवत्यधिकनवशतसंख्याकाभिःपूर्वोक्तस०तिभिःपरमात्मानंप्रणवेनाष्टसंख्याकाभिःपूर्वो०भिःगणेशाद्यावरणदेवतास्तन्नन्नोममंत्रेणएकैकयाज्याकृत्वाब्रह्मादिमंडलदेवतास्तन्नंमंत्रेणएकैकयाज्याकृत्वाशेषेणस्विष्टकृतमित्यादिआज्यभागपर्यंतंकुर्यात्। याजुषाणांतुवरुणंहिरित्यादिव्याहृत्यंतं॥अथर्विजःपूर्वोक्तरुद्रमंत्रेणपूर्वोक्तइध्येः यथाइध्यविभागंसहस्राकृतीर्जुह्वयुः॥सचविभागःप्रतिइध्यंमूलसंख्याचतुर्थांशसंख्याकः। एवमग्रेपि। ततोविष्णवेब्रह्मणेचपूर्ववदन्वाधानोक्तसंख्यायोन्यइध्यानिकृत्वासमस्तव्याहृतीभिःचतुर्विंशत्यधिकशतसंख्याकाआकृतीःपूर्ववन्नरेवइध्येःएकैकमृत्विक्कुजुह्वयात्। ततःप्रणवेनहृदितिजोएकैकांसमिधंकृत्वाअन्यौहोआज्येनएकैकामाकृतिंजुह्वयातां। ततःअपरोद्वौचरुणा। अवशिष्टौद्वौतिलमिश्रयवैः। ततआचार्यःगणपत्याद्यावरणदेवताभ्योब्रह्मादिमंडलदेवताभ्यश्चप्रत्येकंएकैकामाज्याकृतिंकृत्वा

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

स्विष्टकृदादिहोमशेषंसमापयेत्। अंगहोमादितुयाज्ञिकाणां। ततोयजमानःआचार्यादीन्सम
भ्यर्च्यविभवानुसारेणतेभ्योदक्षिणांदत्वाअन्येभ्योभूयसीदत्वाहोमकर्मदेवायसमर्पयेत्। ततोले
ह्यपेक्षादिषड्रसंकल्पितमन्नंदेवायदत्तमितिनिवेद्यतेनैवान्नेनयावत्तृप्तिआचार्यादीन्संभोज्ययथा
क्तिसमांशतःभोजनांगत्वेनदक्षिणांदद्यात्। ततःसहस्रंब्राह्मणान्पूजनपूर्वकंएकस्मिन्दिने भो
जयेत्। अथवाबहुदिनेषुब्राह्मणभोजनं॥ ततस्तेभ्योयथाशक्तिदक्षिणांचदद्यात्। एवंदीनांध
कृपणादीनामपिप्रत्यहंभोजनंदत्वाप्रत्यहंस्वयंसमाहितमनाःसहघृक्तोभुंजीत॥ इतिसहस्र
भोजनपुनस्तथैवयज्ञमंत्ररहितःपूर्ववद्धोमःकार्यः॥ इतिसहस्रभोजनप्रयोगः॥ ॥ ॥

DR. BHAU DAJI MEMORIAL

286